**रासेवास** पु० ६त० अलुक् स० । १गोष्ठ्यां, २रासे, ३श्टङ्गारे ४रसविज्ञौ, ५रसावासे, ६षष्ठीजागरे च मेदि० । ७उत्सवे शब्दच० ८परिहासे जटा० ।

**रासेश्वरी** स्त्री ६त० । राधिकायाम् ।

**रास्ना** स्त्री रस-घन् । १स्वनामख्यातायां लतायाम् (काँटा आमरूल) । तत्पर्य्यायगुणा भावप्र० उक्ता यथा "रास्ना युक्तरसा रस्या सुवहा रसना रसा । एलापर्णी च सुरसा सुस्निग्धा श्रेयसी तथा । रास्नाऽऽमपाचनी तिक्ता गुरूष्णा कफवातजित् । शोथश्वाससमीरास्रवातशूलोदरापहा । कासज्वरविषाशीतिवातिकामयसिध्महृत्" भावप्र० । २नाकुल्यां भावप्र० तत्पर्य्यायगुणा उक्ता यथा "नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली । नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी । नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । भोगिलूताष्टश्चिकाखुविषज्वरकृमिव्रणान्" ।

**राहु** पु० रह-उण् । १त्यागे, २त्यक्तरि, ज्योतिश्चक्रस्थे सूर्य्यकिरणसम्पर्काभावेन जायमानपृथिवीच्छायारूपे ३तमसि तदधिष्ठातरि ४ग्रहभेदे, ५सिंहिकासुते दानवे च । तमःशब्दे दृश्यम् ।

**राहुच्छत्त्र** न० राहोर्ग्रहस्य छत्त्रमिव । आर्द्रके राजनि० ।

**राहुदर्शन** न० राहोर्दर्शनं यत्र । चन्द्रसूर्य्ययोरुपरागरूपे १ग्रहणे "स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने" इति ति०त० । तेन उपरोक्ते एव चन्द्रे सूर्य्ये च तस्य दृश्यता नान्यदा तस्य छायारूपत्वात् ।

**राहुमूर्द्धभिद्** पु० राहोः सिंहिकासुतस्य मूर्द्धानं भिनत्ति भिद-क्विप् । विष्णौ । अमृतपानकाले देवपङ्क्तौ देवरूपेण स्थित्वाऽमृतं पिबन्तं दृष्ट्वा विष्णुस्तस्य शिरश्चिच्छेदेति भाग० ८।९ अ० ।

**राहुरत्न** न० राहोः प्रियं रत्नम् । गोमेदमणौ राजनि० ।

**राहुस्पर्श** पु० राहोः स्पर्शः स्वाधिष्ठितभूच्छायाद्वारा यत्र । चन्द्रसूर्य्ययोः उपरागरूपे ग्रहणे हलायुधः ।

**राह्वुच्छिष्ट** पु० ६त० । लशुने त्रिका० ।

**राहूत्सृष्ट** पु० ६त० । लशुने हारा० ।

**रि** गतौ तु० पर० सक० अनिट् । रियति अरैषीत् रिराय ।

**रिक्त** न० रिच-क्त । १शून्ये २वने मेदि० । ३निरर्थके च त्रि० शब्दर० । स्वार्थे क । तत्रैव त्रि० ।

**रिक्तभाण्ड** न० रिक्तं भाण्डम् । तैलादिशून्ये भाण्डे ।

**रिक्तहस्त** त्रि० रिक्तो धनादिशून्यो हस्तो यस्य । १निर्धने, भूरिदानादिना २व्ययितधने च । [तिथिषु ज्यो०त० ।

**रिक्ता** स्त्री रिच-क्त । उभयपक्षयोश्चतुर्थीनवमीचतुर्दशी-

**रिक्थ** न० रिच-थक् । १धने अमरः । २मिताक्षराद्युक्ते अप्रतिबन्धे दाये च "स्वामी रिक्थक्रयसंविभागेत्यादि" गौतमस्मृतिः ।

**रिक्थग्राहिन्** त्रि० रिक्थं दायं गृह्णाति । ग्रह-णिनि । दायहारिणि पुत्रादौ । अण् । रिक्थग्राहोऽप्यत्र ।

**रिक्थिन्** त्रि० रिक्थं ग्राह्यत्वेनास्त्यस्य इनि । दायहारिणि दायादे "उभयोरप्यसौ रिक्थी" इति मनुः ।

**रिख** सर्पणे भ्वा० पर० अक० सेट् इदित् । रिङ्खति अरिङ्खीत् । अनिदित्यप्ययमित्येके रेखति अरेखीत् ।

**रिग** गतौ भ्वा०पर०सक०सेट् इदित् । रिङ्गति अरिङ्गीत् ।

**रिङ्गण** न० रिगि-ल्युट् । स्खलने । रिखि ल्युट् । रिङ्खणमप्यत्र

**रिच** सम्पर्के वियोगे च वा चु०उभ० पक्षे भ्वा०पर०सक०सेट् । रेचयति ते रेचति । अरीरिचत् त अरेचीत् ।

**रिच** विरेके (अतिशय पुरीषोत्सर्गे) रुधा०उभ०सक०अनिट् । रिणक्ति रिङ्क्ते इरित् अरिचत् अरैक्षीत् अरिक्त । अति+अतिक्रम्य स्थिते आधिक्येन स्थितौ अक० । अतिरेकः वि+अति भेदे तदसत्त्वे तदसत्त्वरूपे पदार्थे च व्यतिरेकः ।

**रिज** भर्जने भ्वा० आ०सक० सेट् । रेजते अरेजिष्ट ।

**रिपु** पु० रप-उन् पृषो० । १शत्रौ अमरः । २चोरनामगन्धद्रव्ये राजनि० । ज्योतिषोक्ते लग्नापेक्षया ३षष्ठस्थाने च । देहिस्थेषु षट्सु ४कामक्रोधादिषु । "कामः क्रोधश्च मोहश्च मात्सर्य्यं मदलोभकौ । देहिस्था रिपवश्चेति" पुरा० ।

**रिपुघातिनी** स्त्री रिपुं हन्ति हन-णिनि । (कुँ चुइ) लताभेदे शब्दच० । २शत्रुघातके त्रि० । [२नृपभेदे पु० ।

**रिपुञ्जय** त्रि० रिपुञ्जयति जि-खच् मुम् । १शत्रुजयिनि,

**रिन्फ** वधे तु० प० सक० सेट् । रिम्फति अरिम्फीत् रिम्फते

**रिप्फ** पु० रिन्फ-अच् पृषो० । लग्नापेक्षया द्वादशे स्थाने ज्यो०

**रिफ** कत्थने भौ० पर० सक० सेट् । रेफति अरेफीत् ।

**रिफ** हिंसायां निन्दायां बोधने च सक० श्लाघायाम् अक० तु० पर० सेट् । रिफति अरेफीत् ।

**रिव** गत्यां भ्वा०पर०सक०सेट् इदित् । रिम्वति अरिम्वीत् ।

**रिभ** रवे भ्वा० पर० सक० सेट् । रेभति अरेभीत् ।

**रिव** गतौ भ्वा०पर०सक०सेट् इदित् । रिण्वति अरिण्वीत् ।

**रिश** हिंसायां तु०पर०सक०अनिट् । रिशति अरिक्षत् ।

**रिश्य(ष्य)** स्त्री रिश्य(ष्य)ते रिश(ष)-क्यप् । मृगभेदे त्रिका स्त्रियां योपधत्वात् टाप् । ऋष्यस्तत्रार्थे शब्दर० ।